M.G.UNIVERSITY
MODEL QUESTION PAPER
RESTRUCTURED SYLLABUS
PGCSS
M.A. Sanskrit Special Vyakarana
SEMESTER IV

# Course-XX Elective- IV -Fundamentals of Yoga and Astrology

***Texts-*** *The Yogasutra ( Selected portions)*
*Muhurtapadavi (Selected portions)*
*Jatakadesa (Selected portions)*

संस्कृतभाषायमुत्तराणि देयानि। देवनागरीलिपिरुपयोक्तन्या

Time: 3hrs. Weightage: 30

## PART A

1-8 पञ्चानां पुटपरिमिता व्याख्या कार्या-

1. तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः।
2. शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।
3. प्रत्यक्षानुमानागमाः प्रमाणानि।
4. मैत्री-करुणा-मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातच्चित्तप्रसादनम्।
5. व्याधि-स्त्यान-संशय-प्रमादालस्याविरति-भ्रान्ति-
दर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः।
6. अयनक्षणवासरर्त्तवो मासोऽर्धंच समा च भास्कराद्-
कटुकलवणतिक्तमिश्रिता मधुराम्लौ च कषाय इत्यपि।।
7. क्रिय, तावुरु, जूतुम कुलीर, लेय, पार्त्थोन, जूक, कोर्प्य्याख्याः,
तौक्षिक, आकोकेरो हृद्रोग, श्चान्त्यभं, चेत्थम्।।
8. तत्रैकांगुलियातं दम्पत्योर्ज्जन्मतारकाद्वितयं
निन्त्यं, मध्यांगुलिकं कष्टतरं तग्धि मद्ध्यरज्वाख्यम्।।

5x1=5

## PART-B

9-16 पञ्च पुटद्वयमनतिक्रम्य उपन्यस्यत-
कारिकाद्विकाः विशदय्य व्याख्यात-

9.(क) लग्नात् सुतं च नवमं च विदुस्त्रिकोणम्।
तस्मात् चतुर्थनिधने चतुरश्रसंज्ञे।।

(ख) आदित्यादजगोमृगास्यवनिताः कर्क्की च मीनस्तुलाः।
स्वोच्चर्क्षाण्यथ तेषु दिग्घुतवहानष्टोत्तरां विशतिम्।।
तिथ्यांशान् शरसप्तविंशतिकृतीन्नत्युच्चकांशान् विदुः।
स्तेभ्यः सप्तमराशयोऽशकयुता नीचा ग्रहाणां क्रमात्।।

10.(क) कालात्मा दिनकृन्मनस्तुहिनगुः,सत्वं कुजो ज्ञो वचो।
जीवो ज्ञानसुखे सितश्च मदनो, दुखं दिनेशात्मजः।
राजानौ रविशीतगू, क्षितिसुतो नेता, कुमारो बुधः।
सूरिर्दानवपूजितश्च सजिवौ प्रेष्यः सहस्रांशुजः।।

(ख) तातश्चात्मप्रभवो द्युमणि रथमनोमातरौशीतरश्मिर्-
भ्राता सत्वं च भौमः क्षितिरपि वचनं ज्ञानमिन्दोस्तनूजः
धीचित्पुत्राङ्गसौख्यं सुरगुरुरबलाभोगयानानि शुक्रो
मृत्युर्व्याधिश्च दुःखं शनिरिति गदितो दासभृत्यादिको वा

11. (क) शत्रू, मन्दसितौ समः शशिसुतो मित्राणि शेषा रवे-
स्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शोषाः समाः शीतगोः
जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्की समौ
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे।।

(ख) सूरेः सौम्यसितावरी रविसुतो मध्यः परे त्वन्यथा
सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी
शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येऽरयोः
ये प्रोक्ताः सुहृदस्त्रिकोणभवनात् तेऽमी मया कीर्तिताः।।

12. (क) भावाधीशे च भावे सति बलरहिते च ग्रहे कारकाख्ये
पापान्तःस्थे च पापैररिभिरपि समेतेक्षिते नान्यखेटैः

पापैस्तद्बन्धुमृत्यु व्ययभवनगतैस्तत् त्रिकोणस्थितैर्वा
वाच्या तदाभावहानिः स्फुटमिह भवति द्वित्रिसंवादभावात्।।

(ख) स्वामी कारकखेचरश्च बलिनौ यस्येष्टभावस्थितौ
सम्पूर्णोऽनुभवक्षमश्च नियतं भावः स नॄणां
रिःप्भारातिमृतिस्थितौ च विबलौ यत्कारकाधीश्वरौ
भावोऽयं न हि सम्भवेदिह नृणां कास्यानुभूतौ कथा।।

13. (क) सर्वत्र भावगृहतत्पतिकारकाख्यैस्त-
द्युक्तवीक्षकखगैरपि तद्गणैश्च
चिन्त्यानि भावजफलान्यखिलानि युक्त्या
नृणां विलग्नभवनादथवा शशाङ्कात्।।

(ख) सौम्याः शुभानि खलु भावफलानि कुर्यु-
रन्यानि हन्युरपरे विपरीतमेव
एकग्रहस्य तु शुभाशुभकारकत्वे
प्राप्ते ह्ययं बलयुतः शुभदोऽन्यथाऽन्यः।।

14. (क) भावे तदीशस्थितभांशके वा
तेषां त्रिकोणे च यदा चरन्ती
लग्नेशभावाधिपकारकाख्या
स्तदा तु भावा सफला भवन्ति।।

(ख) यदा चरति तत्रैव रन्ध्रपो मान्दिफेश्वरः
खरद्रेक्काणपो वापि भावनाशस्तदा भवेत्।।

15. (क) श्रीमत्ता तु विचिन्त्या स्वोच्चक्षेत्रत्रिकोणसंस्थानं
बाहुल्यादपि समुदायाष्टकवर्गे व्ययात् फलाधिक्ये
लाभगृहस्य च सुनभामुख्यैर्योगैर्धनाब्धियोगाच्च

(ख) कारकखेटवशादपि वसुमद्भाग्यादिभिश्च रुचकाद्यैः
योगैरपि भाग्यगृहे बलवत्शुभयोगतो बलवशाच्च ।।

16. (क) निमित्तं चापि सञ्चिन्त्य विवाहं कारयेद्बुधः
अतीव चिन्तनीया हि नृणामुद्वाहनक्रिया।।

ख) दम्पत्योः पादपाण्यादौ लक्षणं जन्मगलग्नतः
फलं प्रश्नवशाद्वापि बलिनः वायसस्य वा।।

5x2=10

## PART-C

17-22 त्रीन् उपन्यस्यत

17. नित्यदोषाः।
18. षट्दोषाः।
19. आनुकूल्येषु मुख्यं पञ्चकं षट्कं वा परिचाययत।
20. रज्जुवेधौ विवृणुत।
21. भावफलसिद्धिं जातकादेशोक्तदिशा विशदयत।
22. भावनाशलक्षणानि यथाग्रन्थं विवृणुत। 3x5=15